# B-231090-B

## विषय : संस्कृत

समय : 3 घण्टे ] [ पूर्णांक : 75

*निर्देश* : (*i*) सर्वे प्रश्नाः समाधेयाः।

(*ii*) उत्तराणि सुन्दराणि सुस्पष्टानि च भवेयुः।

**प्रश्न–1** निम्नलिखितयोः रेखाङ्कितपदयोः सन्धिविच्छेदं कृत्वा तयोः नाम्नी लिखत— [1×2=2]

(क) कोकिलाः मधुरगीतं गायन्ति।

(ख) भवतः मनोरथः पूर्णं भवतु।

**प्रश्न–2** निम्नरेखाङ्कितप्रकृतिप्रत्ययौ परस्परं योजयित्वा वाक्यसहितं लिखत— [1×2=2]

(क) त्वं ग्रन्थं पठ्+तुमुन् इच्छसि।

(ख) कीदृश+ई (ङीप्) तव मैत्री ?

**प्रश्न–3** निम्नलिखितयोः अङ्कयोः अनुवादं संस्कृतभाषया कुरुत— [1×2=2]

(क) एक सौ दो (102)

(ख) एक सौ पैंतालीस (145)

प्रश्न-4 यथानिर्देशं वाच्यं परिवर्तयत— [1×2=2]

(क) अश्वैः धाव्यते। (कर्तृवाच्ये)

(ख) अहं सूर्यं पश्यामि। (कर्मवाच्ये)

प्रश्न-5 अधोलिखितरेखाङ्कितपदानां समासविग्रहं कृत्वा तेषां नामन्यपि लिखत— [1×3=3]

(क) श्वेताम्बरा मम हृदि विराजताम्।

(ख) दानवीरः कर्णः जगत्प्रसिद्धः।

(ग) हे मित्र! यथाकामम् अत्र तिष्ठतु।

realme

प्रश्न- अधोलिखितगद्यांशात् त्रीणि अव्ययपदानि चित्वा लिखत— [1×3=3]

चाणक्यः — पूर्वम् 'अनृतम्' इदानीम् 'आसीत्' इति परस्परविरुद्धे वचने।

प्रश्न-7 अधोलिखितानि वाक्यानि (कारकदृष्ट्या) संशोधयत— [1×3=3]

(क) पिता पुत्रीं स्निह्यति।

(ख) सः याचकः पादस्य पंगुः अस्ति।

(ग) शङ्करं नमः।

प्रश्न-8 अधोलिखितं गद्यांशं पठित्वा निर्देशानुसारेण प्रदत्तप्रश्नानाम् उत्तराणि लिखत— [1×3=3]

यदा वर्षाकाले अरपानद्यां जलप्लावनं जातम्। तदा बिलासा नौकया जनान् संतारयति स्म। एवमेव सा नौकाचालने अपि पारङ्गता जाता। सा लोकनृत्यगीतयोः अपि सिद्धा आसीत्। ग्रामस्य सर्वेषु कार्यक्रमेषु सा अग्रसरासीत्।

*प्रश्नाः*

(क) "एवमेव सा नौकाचालनेऽपि पारङ्गता जाता।" इत्यस्य मातृभाषया अनुवादं कुरुत।

(ख) "संतारयति स्म" इति क्रियापदस्य कर्तृपदं किम् अस्ति?

(ग) "सर्वेषु कार्यक्रमेषु" अनयोः पदयोः विशेषणपदं किम् अस्ति?

प्रश्न-9 अधोलिखितं गद्यांशं पठित्वा निर्देशानुसारेण प्रदत्तप्रश्नानाम् उत्तराणि लिखत— [1×3=3]

अपि च किं मङ्गले जीवनम् आसीत् आहोस्वित् भविष्यति वा? तस्याधारस्य, संरचनायाः, वातावरणस्य तत्रस्थाः ये खनिजपदार्थाः तस्य अध्ययनम्। किं मङ्गलग्रहे जलस्य अस्तित्वम् आसीत्? किमत्र रक्तग्रहे मीथेन अस्ति वा न वा, यतः तस्यास्तित्वमेव जैविकं क्रियाकलापं निर्दिशति। एते प्रश्नाः अपि शोधनीयाः।

*प्रश्ना:*

(क) "अपि च किं मङ्गले जीवनम् आसीत् आहोस्वित् भविष्यति वा?" इत्यस्य वाक्यस्य हिन्दीभाषया अनुवादं कुरुत।

(ख) "ये खनिजपदार्था: तस्य अध्ययनम्" इत्यत्र रेखाङ्कितपदयो: विशेष्यपदं किम्?

(ग) गद्यांशे 'रक्तग्रहे' इति शब्द: कस्य ग्रहस्य कृते प्रयुक्त: ?

**प्रश्न-10** अधोलिखितं श्लोकं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत— [1×3=3]

मृगा: मृगै: संगमनुव्रजन्ति,
गावश्च गोभिस्तुरगास्तुरङ्गै:।
मूर्खाश्च मूर्खै: सुधिय: सुधीभि:,
समानशील व्यसनेषु सख्यम्॥

*प्रश्ना:*

(क) अस्मिन् श्लोके क्रियापदम् अस्ति तत् चित्वा लिखत।

(ख) के सुधीभि: संगमनुव्रजन्ति?

(ग) "समानशीलव्यसनेषु सख्यम्" इति सूक्ते: हिन्दीभाषया अर्थं लिखत।

**प्रश्न-11** अधोलिखितं श्लोकं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत— [1×3=3]

अपठद् योऽखिला: विद्या:,
कला: सर्वा: अशिक्षत।
अजानात् सकलं वेद्यं,
स वै योग्यतमो नर: ॥

*प्रश्ना:*

(क) "कला: सर्वा: अशिक्षत।" इत्यस्य हिन्दीभाषया अनुवादं कुरुत।

(ख) "योग्यतम: नर:" इत्यनयो: पदयो: विशेष्यपदं किम् अस्ति?

(ग) "सकला:" इत्यस्य पर्यायपदं किम्?

**प्रश्न-12** अधोलिखितानां प्रश्नानामुत्तराणि संस्कृतभाषया लिखत— [1×4=4]

(क) भारत्यै किम् अतीव रोचते ?

(ख) क: चन्दनदासं द्रष्टुमिच्छति ?

(ग) संसारे कानि-कानि चक्रवत् परिवर्तन्ते ?

(घ) क: देश: स्वकीये प्रथमप्रयासे मंगलग्रहकक्षम् अलभत ?

***अथवा***

अधोलिखितेषु वाक्येषु रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरुत—

(क) प्राणेभ्योऽपि प्रिय: <u>सुहृद्</u>।

(ख) <u>चौरस्य</u> पादध्वनिना अतिथि: प्रबुद्ध: ।

(ग) <u>उभौ</u> शवं चत्वरे स्थापितवन्तौ।

(घ) <u>स्वामिन: आत्मानन्दस्य</u> बाल्यकालस्य नाम तुलेन्द्र: आसीत्।

**प्रश्न-13** अधोलिखितानां प्रश्नानामुत्तराणि हिन्दीभाषया लिखत— [1×4=4]

(क) शृगाल: वधूं किं निर्देशितवान् ?

(ख) किं पर्व आसन्नं वर्तते ?

(ग) मंगलयानं कुत: विमुक्तम् ?

(घ) कीदृश: परिवार: वरम् अस्ति ?

***अथवा***

अधोलिखितानां प्रश्नानामुत्तराणि हिन्दीभाषया लिखत—

(क) संस्कृते महर्षिभि: किं प्रोक्तम् ?

(ख) सूर्य: चन्द्रश्च ओदनस्य कौ स्त: ?

(ग) हेमन्ते दिवसा: कीदृशा: भवन्ति ?

(घ) सर्वत्र के न भवन्ति ?

प्रश्न-14 स्वपाठ्यपुस्तकात् चतस्त्रः सूक्तीः लिखत, याः प्रश्नपत्रेऽस्मिन् नागताः स्युः। [1×4=4]

**अथवा**

अधः प्रदत्तसूक्तीनां हिन्दीभाषया भावार्थं लिखत—

(क) अलसस्य कुतो विद्या।

(ख) गतस्य शोचनं न करणीयम्।

(ग) न्याय्यात् पथः प्रविचलन्ति पदं न धीराः।

(घ) मनः पूतं समाचरेत्।

प्रश्न-15 स्वपाठ्यपुस्तकात् कौचित् द्वौ सुभाषितश्लोकौ लिखत, यौ अस्मिन् प्रश्नपत्रे न समागतौ स्याताम्। [2½×2=5]

**अथवा**

अधः द्वौ अपूर्णौ सुभाषितश्लोकौ प्रदीयते, तौ श्लोकौ स्वपाठ्यपुस्तकाधारेण पूरयत—

(क) केषाञ्चिदपि ——।

—— हस्तेषु क्षुरिका यथा॥

(ख) उद्यमः साहसं —— ।

—— सहायकृत्॥

प्रश्न-16 (अ) भवतः नाम दिवाकरः सिदारः अस्ति। भवतः विद्यालयस्य नाम शासकीयः उच्चतरः माध्यमिकः विद्यालयः पुसौरः अस्ति। स्वस्य अपरिहार्यकारणवशात् (किमपि) त्रिदिनात्मकम् अवकाशस्य हेतोः स्वप्राचार्यं प्रति एकम् आवेदनपत्रं लिखतु। [1+2+1=4]

**अथवा**

भवतः नाम दीपेशः अस्ति। भवान् अधोलिखितां मञ्जूषां दृष्ट्वा शुल्कमुक्त्यर्थं लिखिते अस्मिन् पत्रे रिक्तस्थानानि पूरयन् पूर्णम् आवेदनपत्रं लिखतु।

[आशासे, पञ्चम्यां, पञ्चसहस्त्ररुप्यकाणि, निवेदनम्, अनुग्रहीष्यति, निर्वाहः, शुल्कमुक्तये, छात्रः]

सेवायाम्

प्राचार्य:

शासकीय-उच्चतर-माध्यमिक

विद्यालय: जगदलपुरम् (छत्तीसगढम्)

विषय: (*i*) -------- प्रार्थनापत्रम्।

महोदय!

सविनयं (*ii*) -------- अस्ति यदहं भवत: विद्यालये दशमकक्षाया: (*iii*) -------- अस्मि। मम पिता एक: कृषक: अस्ति। तस्य मासिक: आय: (*iv*) -------- अस्ति। मम एक: भ्राता अष्टमकक्षायां भगिनी च (*v*) -------- कक्षायां पठति। अस्माकं कुटुम्बस्य (*vi*) -------- अतीव काठिन्येन भवति।

अत: शुल्कमुक्त्यर्थं प्रार्थयेऽहम्। (*vii*) -------- अत्र भवान् मम एतां प्रार्थनां स्वीकृत्य (*viii*) --------।

दिनाङ्क: —— / —— / ——

भवत: विनीत: शिष्य:

दीपेश:

कक्षा-दशमी

(ब) अधोलिखितम् अपठितांशं पठित्वा निर्देशानुसारेण संस्कृतभाषया उत्तरत—

जनानां लोकानां वा तन्त्रं शासनं जनतन्त्रं वा कथ्यते। लोकतन्त्रे जनानां कल्याणम् एव शासनस्य प्रमुखं कार्यं मन्यते। अत्र प्रत्येकस्य जनस्य एव महत्त्वम्। भाषणे लेखने च अत्र पूर्णं स्वातन्त्र्यं भवति।

व्यवहारे केचन दोषा: अपि दृश्यन्ते। एतेषां दोषाणां दूरीकरणम् अनिवार्यम्। एतदर्थं सर्वेभ्य: शिक्षा अनिवार्या। शिक्षां विना लोकतन्त्रं सुरक्षितं न भवति।

*प्रश्ना:* [1×4=4]

(क) कां विना लोकतन्त्रं सुरक्षितं न भवति?

(ख) लोकतन्त्रे शासनस्य किं प्रमुखं कार्यं मन्यते?

(ग) लोकतन्त्रे किमर्थं शिक्षा अनिवार्या ?

(घ) किं नाम लोकतन्त्रम् ?

*अथवा*

(क) संस्कृतभाषया सारांशं लिखत। [3]

(ख) अपठितगद्यांशस्य उचितं शीर्षकं लिखत। [1]

**प्रश्न-17** अधः प्रदत्तविषयेषु कमपि एकमधिकृत्य संस्कृतभाषया द्वादशवाक्यैः निबन्धं लिखत— [½×12=6]

(क) सदाचारः

(ख) महाकविः कालिदासः

(ग) मम प्रदेशः (छत्तीसगढः)

(घ) ग्राम्यजीवनम्

**प्रश्न-18** **(अ)** उचितं विकल्पं चित्वा लिखत— [1×5=

(*i*) लोष्ठं गलितं जातम्—

(क) दुग्धेन (ख) जलेन

(ग) फलेन (घ) बलेन

(*ii*) क्रोधात् भवति—

(क) स्मृतिभ्रंशः (ख) सम्मोहः

(ग) बुद्धिनाशः (घ) सर्वनाशः

(*iii*) "<u>मम</u> जीवनं संस्कृतमयं वर्तते।" इत्यत्र रेखाङ्कितपदस्य विभक्तिः अस्ति—

(क) प्रथमा (ख) पञ्चमी

(ग) षष्ठी (घ) तृतीया

(*iv*) "हे <u>जगदीश</u>! पाहि माम्।" इत्यत्र रेखाङ्कितपदस्य समुचितसन्धिविच्छेदो भविष्यति—

(क) जगद् + ईश (ख) जगति + ईश

(ग) जगत् + ईश (घ) जग + दीश

(*v*) "खगा: आकाशे <u>उत्पतन्ति</u>।" इत्यत्र रेखाङ्कित पदेऽस्ति—

(क) उत्-धातु: (ख) उत्-धात्वंश:

(ग) उत्-उपसर्ग: (घ) उत्-प्रत्यय:

**(ब)** उचितं विकल्पं चित्वा रिक्तस्थानानि पूरयत् वाक्यं पुनः लिखत— [1×5=5]

(श्रेयः, ध्येयवाक्यं, त्वं, तृतीया, रोचिष्यते)

(*i*) —— सत्यं कथयसि।

(*ii*) भवते गुरो: पाठनं —— ।

(*iii*) यस्य —— सर्वत्र प्रशंसितम् आसीत्।

(*iv*) लाभानाम् उत्तमं ——।

(*v*) 'प्रीत्या' इति पदे —— विभक्ति: अस्ति।

**(स)** स्तम्भस्य सुमेलनं कुरुत— [1×5=5]

| | (क) | | (ख) |
|---|---|---|---|
| (*i*) | काल्पनिक: | - | आरोपितवन्त: |
| (*ii*) | अलम् | - | लङ् लकारस्य एकवचनम् |
| (*iii*) | अवर्तत | - | ब्रह्म |
| (*iv*) | एतान् वृक्षान् | - | ठक् |
| (*v*) | ओदनस्य मुखम् | - | मिथ्याभाषणेन |

———